# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – २** | **गुणाः – ५०** |
| **विषयः – साहित्यम्** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – काव्यलङ्कारसूत्रवृत्तिः** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः सूत्रयोः व्याख्या कार्या।**

१ ओजःप्रसादश्लेषसमतासमाधिमाधुर्यसौकुमार्योदारताऽर्थव्यक्तिकान्तयो बन्धगुणाः।
२ न पृथक् आरोहावरोहयोरोजःप्रसादरूपत्वात्।
३ पादानुप्रासः यमकवत्।
४ इष्टं पुन्नपुंसकयोः प्रायेण।

**प्रश्नः २** प्रसादश्लेषयोः अर्थगुणयोः यथाग्रन्थं प्रतिपादनं कुरुत।

**प्रश्नः ३** सूक्ष्मार्थं यथाग्रन्थं विवेचयत।

**प्रश्नः ४** यमकालङ्कारं विवृणुत।

**प्रश्नः ५** उपमानिरूपणं यथाग्रन्थं कुरुत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः सूत्रयोः व्याख्या कार्या।**

१ न पादादौ ल्वादयः।
२ खिद्यत इति च।
३ प्रतिभादयः प्रज्ञादिषु
४ मन्दं मन्दमित्यप्रकारार्थत्वे।

**प्रश्नः ७** 'शक्यमिति रूपं विलिङ्गवचनस्यापि कर्माभिधायां सामान्योपक्रमात्' इति सूत्रं ग्रन्थानुसारं विवेचयत।

**प्रश्नः ८** ‘चक्षिङ्क्षो द्व्यनुबन्धकरणम्’ सूत्रमिदं व्याख्यायत ।

**प्रश्नः ९** ‘लभेर्गत्यर्थत्वाण्णिच्यणौ कर्तुः कर्मत्वाकर्मत्वे’ सूत्रमिदं यथाग्रन्थं व्याख्यायत ।

**प्रश्नः १०** ‘मनुष्यजातेर्विवक्षाविवक्षे’ सूत्रं व्याख्यायत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ काव्यालङ्कारसूत्रवृत्तिकारः कः ?
२ काव्यालङ्कारसूत्रवृत्तौ कति अधिकरणानि ?
३ काव्यशोभायाः कर्तारो धर्माः के ?
४ अजरठत्वं किम् ?
५ तृतीयाधिकरणस्य प्रथमाध्यायस्य नाम किम् ?
६ को नाम प्रसादः ?
७ का नाम शृङ्खला ?
८ असम्भवः नामकः दोषः कस्यालङ्कारस्य ?
९ समासोक्तेः किं लक्षणम् ?
१० ‘न केतकीनां विलसन्ति सूचयः....’ कस्यालङ्कारस्य उदाहरणम् ?
११ का नाम वक्रोक्तिः ?
१२ पञ्चमाधिकरणस्य नाम किम् ?
१३ पादादौ के शब्दाः न प्रयोज्याः ?
१४ ‘वलेः’ आत्मनेपदं नित्यं वा अनित्यम् ?
१५ ‘प्रपीय’ इत्यत्र कः धातुः ?

****